309sk15

# 15

# हिमालयो नाम नगाधिराजः

भवन्तः जानन्ति एव यत् 'हिमालयः' भारतस्य महान् पर्वतः अस्ति। एषः न केवलं हिमस्य आलयः अपितु ओषधीनाम् आलयः, रत्नानाम् आकरः अपि। प्राकृतिकसौन्दर्येण पूर्णः अयम्। एषः सर्वोच्च शिखरः अतः अयं पर्वतराजः कथ्यते। 'पावनगङ्गायाः उद्गमस्थलम् अपि अस्ति। अतः पवित्रः अस्य प्रदेशः। पाठेऽस्मिन् महाकविकालिदासकृतं हिमालयस्य मनोहरं प्राकृतिकं सौन्दर्यवर्णनं पठामः वयम्।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्–

- हिमालयस्य वर्णनं लेखितुं शक्तः भविष्यति;
- पाठे प्रयुक्तानाम् उपमानां चयनं कर्तुं शक्ष्यति;
- पाठस्य श्लोकानाम् अन्वयं पदच्छेदं च करिष्यति;
- पाठात् सूक्तीनां चयनं करिष्यति;
- पाठे प्रयुक्तकृदन्तपदेषु क्त–तुमुन्–ल्यप् प्रत्ययानाम् उल्लेखं करिष्यति;
- बहुव्रीहिसमस्तपदानां च विग्रहं लेखिष्यति;
- गच्छत्, धनवत्, इन्दु, मधु शब्दानां रूपाणि लेखिष्यति।

टिप्पणी

## क्रियाकलापः

समक्षं भारतस्य मानचित्रं दृष्ट्वा अधः प्रदत्ततालिकायां त्रयाणां तीर्थस्थानानां त्रयाणां नगराणां तिसृणां नदीनां च नामानि लिखन्तु।




15.1

| | |
|---|---|
| त्रीणि तीर्थस्थानानि | |
| त्रीणि नगराणि | |
| तिस्रः नद्यः | |





## 15.1 मूलपाठः

### हिमालयो नाम नगाधिराजः

इदानीम् इमं पाठम् ध्यानेन सस्वरं पठामः।

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।1।।

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निज्जतीन्दोः किरणेष्विवाङ्कः।।2।।

आमेखलं सञ्चरतां घनानां
छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः।।3।।

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति।।4।।

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातै–
रासेव्यते भिन्नशिखण्डिबर्हैः।।5।।

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।।6।।

**शब्दार्थाः**

आमेखलं = पर्वतों के मध्य भाग तक
सञ्चरतां = घूमते हुए
अधः = नीचे की
सानुगतां = चोटियों तक
निषेव्य = सेवन कर
उद्वेजिताः = तंग आकर
सिद्धाः = तपस्वी गण
आतपवन्ति = धूपवाली
शृंगाणि = चोटियों का
आश्रयन्ते = सहारा लेते हैं/आश्रय
कपोलकण्डूः = कनपटी की खाज को
विनेतुं = मिटाने के लिए
विघट्टितानां = रगड़े हुए
सरलद्रुमाणाम् = देवदारू के वृक्षों के
स्रुतक्षीरतया = दूध बहते रहने से
प्रसूतः = उत्पन्न
सानूनि = चोटियों को
सुरभीकरोति = सुगन्धित करता है
दिवाकरात् = सूर्य से
लीनं = छिपे हुए
दिवाभीतम् = दिन से डरे हुए (उल्लू)
क्षुद्रे = नीच के
प्रपन्ने = प्राप्त होने पर
उच्चैः शिरसां = ऊँचे लोगों के
सतीव = सज्जनों की तरह
भागीरथी = गंगा
शीकराणां = बूँदें
वोढा = धारण करने वाली
मुहुः = बार बार
अन्विष्टमृगैः = हिरनों को ढूंढने वाले
किरातैः = किरातों के द्वारा
भिन्न = बिखरे हुए
शिखण्डिबर्हैः = मोर के पंखों से

## 15.2 बोधप्रश्नाः

1. अत्र मूलपाठम् आधृत्य प्रश्नानाम् उत्तराणि युक्तम् (✓) अयुक्तम् (×) इति चिह्नेन निर्दिशन्तु–

   (क) हिमालयः नागानाम्/नगानाम् राजा अस्ति।

   (ख) हिमेन हिमालयस्य सौन्दर्यं नश्यति/वर्धते।

   (ग) हिमालयस्य शृंगाणि आतपवन्ति/तमोयुक्तानि सन्ति।

   (घ) पुष्पाणां गन्धः/सरलवृक्षणां दुग्धस्य गन्धः सानूनि सुरभीकरोति।

   (ङ) हिमालये दिवाभीतः उलूकः/अन्धकारः गुहासु निवसति।

2. पाठं पठित्वा रिक्तस्थानपूर्तिः क्रियताम्

   (क) स्थितः ................................. इव मानदण्डः।

   (ख) ............................................. न सौभाग्यविलोपि जातम्।

   (ग) शृङ्गाणि यस्य .................... सिद्धाः।

   (घ) सानूनि गन्धः ..................... ।

   (ङ) दिवाकराद् ........................ यो गुहासु।

3. अत्र स्तम्भद्वये मेलनं क्रियताम्–

| (अ) | (ब) |
|---|---|
| (क) अस्त्युत्तरस्यां दिशि देवतात्मा | (i) छायामधः सानुगतां निषेव्य |
| (ख) एको हि दोषो गुणसन्निपाते | (ii) ममत्वमुच्चैः शिरसां सतीव |
| (ग) आमेखलं सञ्चरतां घनानां | (iii) हिमालयो नाम नगाधिराजः |
| (घ) क्षुद्रेऽपि नूनं शरणं प्रपन्ने | (iv) निमज्जतीन्दोः किरणेष्विवाङ्कः |

## 15.3 अधुना अवगच्छामः

### प्रथमः अंशः

**श्लोकः 1**

**पदच्छेदः** अस्ति उत्तरस्याम् दिशि देवतात्मा, हिमालयः नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्याः इव मानदण्डः।

**अन्वयः** उत्तरस्यां दिशि देवतात्मा हिमालयः नाम नगाधिराजः अस्ति। (सः) पूर्वापरौ तोयनिधी वगाह्य पृथिव्याः मानदण्डः इव स्थितः (अस्ति)

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।1।।

भवद्भिः हिमालयस्य विषये किमपि पूर्वं पठितम् श्रुतमेव। कालिदासकवेः विषये अपि किमपि ज्ञातमेव। अस्मिन् श्लोके हिमालयः कीदृशः पर्वतः अस्ति? कुत्र च वर्तते इति बोधं कुर्मः।

**व्याख्या**

हिमालयः भारतस्य महान् पर्वतः अस्ति। एषः भारतस्य उत्तरस्यां दिशि स्थितः अस्ति। अयं हिमालयः देवतात्मा अपि कथ्यते। यतः तत्र देवानां तापसानां च निवासः अस्ति। सः नगानाम् (पर्वतानाम्) अधिराजः अस्ति। भारते अनेके पर्वताः विन्ध्यसह्याद्रयः वर्तन्ते परं हिमालयः सर्वश्रेष्ठः पवित्रः चास्ति। हिमालयः पूर्व–पश्चिमसमुद्रयोः मध्ये प्रविष्टः अस्ति। अर्थात् पूर्वस्यां दिशि बंगालखाड़ीसमुद्रः पश्चिमदिशि च अरबसागरः अस्ति।

हिमालयः कस्याः मानदण्डः इव? पृथिव्याः अर्थात् हिमालयः भूमेः परिमाणस्य ज्ञापकः। यथा जले दण्डं निवेश्य तेन जलस्य गाम्भीर्यं ज्ञायते तथैव हिमालयस्य उच्चतां ज्ञात्वा पृथिव्याः गाम्भीर्यं मीयते इति।

**भावार्थः**

हिमालयः भारतस्य उत्तदिशायां स्थितः। एषः हिमेन आवृतः सदा, अतः हिमालयः। पर्वतेषु उन्नततमः, अतः सः पर्वतराजः। तत्र देवानां तापसानां च निवासः, अतः सः देवतात्मा। हिमालयस्य पूर्वदिशि 'बंगाल की खाड़ी' इति नाम समुद्रः पश्चिमदिशि च अरबसागरः इति। एषः तयोः मध्ये एव स्थितः। एवं हि 'अरुणाचलप्रदेशात् कश्मीरप्रदेशपर्यन्तं हिमालयः पृथिव्याः परिणामरूपः दण्ड इव स्थितः अस्ति।

हिमालय भारत की उत्तर दिशा में स्थित है। इसकी चोटियां सबसे ऊँची है अतः इसे पर्वतों का राजा कहते है। अनेक देवों व तपस्वियों की तपोभूमि होने के कारण हिमालय देवस्वरूप भी है। यह पूर्वदिशा में बंगाल की खाड़ी समुद्र में तथा पश्चिम अरब सागर में प्रवेश किया हुआ स्थित है। अतः यह पृथ्वी के परिमाण को बताता है। अर्थात् नापने का डंडा/फुटा आदि के समान है।

## व्याकरणबिन्दवः

**सन्धिच्छेदः**

अस्त्युत्तरस्याम् = अस्ति + उत्तरस्याम् (इ → य् – यण् सन्धिः)

देवातात्मा = देवता + आत्मा (आ + आ = 'आ' दीर्घ सन्धिः)

हिमालयो नाम = हिमालयः + नाम (विसर्गः स्थाने 'उ'– ओ गुणः, विसर्गसन्धिः)

**पदपरिचयः**

वगाह्य = (अव)–व + गाह + ल्यप्

स्थितः = स्था + क्त पुं. प्रथमा एकवचनम्

**विग्रहः**

| | | | |
|---|---|---|---|
| नगाधिराजः | = | नगानाम् अधिराजः | (षष्ठी तत्पुरुषः) |
| हिमालयः | = | हिमस्य आलयः | (षष्ठीतत्पुरुषः) |
| पूर्वापरौ | = | पूर्वः च परः च | (द्वन्द्वः) |
| तोयनिधिः | = | तोयस्य निधिः | (षष्ठीतत्पुरुषः) |
| मानदण्डः | = | मानस्य दण्डः | (षष्ठीतत्पुरुषः) |

**श्लोकः 2**

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।।2।।

**पदच्छेदः** अनन्तरत्न प्रभवस्य यस्य हिमम् न सौभाग्यविलोपि जातम्।
एकः हि दोषः गुणसन्निपाते निमज्जति इन्दोः किरणेषु इव अङ्कः।।

**अन्वयः** यस्य अनन्तरत्नप्रभवस्य हिमं सौभाग्यविलोपि न जातम्। हि गुणसन्निपाते एको दोषः इन्दोः किरणेषु अङ्कः इव निमज्जति।

अस्मिन् पद्ये वयं बोधामः यत् बहुगुणेषु सत्सु एकः दोषः कथं न गण्यते?

**व्याख्या**

अनन्तरत्नानां प्रभवः (उत्पत्तिकर्ता) हिमालयः अस्ति। अर्थात् हिमालये अनेकानि रत्नानि अपि प्राप्यन्ते। रत्नानि तु दीप्तानि बहुमूल्यानि भवन्ति। हिमालयस्य अदभुतं सौन्दर्यं नष्टुं न पारयति किम्? हिमम्! वस्तुतः हिमस्य आधिक्यं दोषः एव यतः तत्र जीवनं सुखदं न भवति। परं तत्र रत्नोत्पत्ति–औषधि–आदयः नैके गुणाः सन्ति। अतः एकः दोषः नैव गण्यः। कलङ्कः= चन्द्रे दृश्यमानः कृष्णवर्णः चिह्नः।

किं चन्द्रस्य कलङ्कः तस्य प्रकाशं बाधते? नैव। अर्थात् चन्द्रे विद्यमानः कलङ्कः सन् अपि चन्द्रः पूर्णशक्त्या भासते।

अल्पदोषः निमज्जति कुत्र? गुणसमूहे। यत्र गुणानाम् आधिक्यं भवति, तदा स्वल्पः दोषः दृश्यते नैव। अत्र हिमालये एकः दोषः उक्तः केवलं हिमम् इति।

हिमदोषस्य उपमानम् अत्र किमुक्तम्? चन्द्रस्य कलङ्कः।

## भावार्थः

हिमालये अनेकानि रत्नानि भवन्ति। अतः तस्य महिमा हिममात्रदोषेण नष्टुं न शक्यते। यथा चन्द्रे स्थितः कलङ्कः दोषः चन्द्रस्य प्रकाशं क्षीणं कर्तुं न शक्यते। अस्य भावः अस्ति "गुणानां समूहे स्वल्पः दोषः निष्प्रभावी भवति।" अतः हिमालयस्य सौन्दर्यम् तु अद्भुतमेव।

अनन्त रत्नों की खान हिमालय की शोभा को बर्फ किसी प्रकार से भी कम नहीं कर सकी क्योंकि गुणों के समूह में एक दोष ऐसे छिप जाता है जैसे चन्द्रमा का कलङ्क उसकी किरणों में। अतः हिमालय का सौन्दर्य अद्भुत है।

**व्याकरणबिन्दवः**

**सन्धिच्छेदः**

| | | | | |
|---|---|---|---|---|
| एको हि | = | एकः | + हि | (विसर्गसन्धिः) |
| निमज्जतीन्दोः | = | निमज्जति | + इन्दोः | (दीर्घसन्धिः) |
| किरणेष्विवाङ्कः | = | किरणेषु | + इव + अङ्कः | (यण्सन्धिः) |

**पदपरिचयः**

| | | |
|---|---|---|
| सन्निपातः | = सम् + नि + पत् + घञ्, | पु. प्रथमा एकवचनम् |
| जातम् | = जन् + क्त, | नपु. प्रथमा एकवचनम् |
| निमज्जति | = नि + मज्ज् | लट् प्र. पु. एकवचनम् |

**विग्रहः**

| | |
|---|---|
| अनन्तरत्नप्रभवस्य – न अन्तः = अनन्तः, अनन्तानि रत्नानि | (कर्मधारयः) |
| अनन्तरत्नानां प्रभवः तस्य | (षष्ठीतत्पुरुषः) |
| सौभाग्यविलोपि – सौभाग्यं विलुम्पति यत् तत् | (उपपद तत्पुरुषः) |
| गुणसन्निपाते – गुणानां सन्निपातः तस्मिन् | (षष्ठीतत्पुरुषः) |

## पाठगतप्रश्नाः 15.1

1. प्रश्नानाम् उत्तराणि लिखन्तु

(क) हिमालयः कस्यां दिशायां स्थितोऽस्ति?

(ख) हिमालयः किमिव स्थितः?

(ग) अनन्तानां रत्नानां प्रभवः कोऽस्ति?

(घ) हिमालयस्य सौन्दर्यं केन न नष्टं जातम्?

(ङ) एकः दोषः कुत्र निमज्जितः भवति?

2. विशेषण–विशेष्यमेलनं क्रियताम्

| | |
|---|---|
| (क) देवतात्मा | (i) हिमालयस्य |
| (ख) पूर्वापरौ | (ii) हिमम् |
| (ग) अनन्तरत्नप्रभवस्य | (iii) हिमालयः |
| (घ) सौभाग्यविलोपि | (iv) तोयनिधी |

3. उचितपदेन वाक्यपूर्तिः क्रियताम्–

(क) हिमालयः .......................... समुद्रौ प्रविश्य स्थितः। (पूर्वोत्तरौ/प्राच्यपश्चिमौ)

(ख) हिमालयः ......................... मानदण्डः। (समुद्रस्य/पृथिव्याः)

(ग) ......................................... दोषः गुणसन्निपाते न दृश्यते। (स्वल्पः/अनल्पः)

## द्वितीयः अंशः

अधुना वयं द्वितीयम् अंशं पठामः।

**श्लोकः 3**

आमरवेलं सञ्चरतां धनानां
छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः।।3।।

**पदच्छेदः** आमेखलम् सञ्चरताम् घनानाम्, छायाम् अधः सानुगताम् निषेव्य।
उत् वेजिता, बृष्टिभिः आश्रयन्ते, शृङ्गाणि यस्य आतपवन्ति सिद्धाः।।

**अन्वयः** आमेखलम् सञ्चरताम् घनानाम् अधः सानुगताम् छायाम् निषेव्य वृष्टिभिः उद्वेजिताः सिद्धाः यस्य आतपवन्ति शृङ्गाणि निषेवन्ते।



15.2

अस्मिन् पद्ये हिमालये तपसि रतानाम् जनानाम् विषये बोधामः।

**व्याख्या**

हिमालये घनाः हिमालयस्य मध्यभागे सञ्चरन्ति तत्र वर्षणं तु प्रायः भवत्येव। वृष्टिभिः तत्र उद्वेजिताः के भवन्ति? सिद्धाः तापसजनाः। ते तत्र गृहस्थजीवनात् दूरं प्रकृति–सान्निध्ये तपः कुर्वन्ति।

सिद्धाः घनानां छायां सेवन्ते कुत्र? शिखराणाम् अधः। हिमालयस्य शिखराणि अति उन्नतानि भवन्ति। अतः मेघानां स्थितिः उच्चशिखरेषु न भवति।

सिद्धाः/तापसाः शैत्यम् अनुभूय किं कुर्वन्ति? सिद्धाः शैत्यम् अनुभूय आतपयुक्तानि शृङ्गाणि सेवन्ते यतः तत्र शिखरेषु सूर्यस्य प्रकाशः भवति, तत्र घनाः न गच्छन्ति। अणिमादिसिद्धाः देवयोनिविशेषाश्च 'सिद्धाः' इति कथ्यन्ते। ते हिमालये तपोबलेन स्वेच्छानुसारं विचरन्ति।

**भावार्थः**

हिमालये तपः साधनारताः तपस्विनः सन्ति। ते कदाचित् तापम् अनुभूय शिखराणाम् अधः गच्छन्ति, सञ्चरतां च मेघानां छायां सेवन्ते। कदाचित् वर्षाजन्यं शैत्यम् अनुभूय

शिखरेषु (उपरिभागे) आतपं सेवन्ते। अर्थात् हिमालये उपरि तापः भवति नीचैः मध्यभागे वा वर्षाकारणात् शैत्यम् भवति। परं तपस्विनः तु स्वेच्छया उपरि, मध्यम् अधः वा गच्छन्ति। तेषां लक्ष्यं तु एकं तपः एव।

जो तपस्वीगण हिमालय पर्वत के मध्यभाग में घूमते हुए बादलों की छाया का चोटियों के नीचे सेवन करते हैं, ऐसे तापसगण निरन्तर वर्षा से परेशान होकर अर्थात् ठंड का अनुभव करके पुनः धूप युक्त चोटियों पर चले जाते हैं अर्थात् तपस्वी लोग इच्छानुसार तपः साधना के लिए सहज रूप से हिमालय के ऊपरी भाग में, मध्यभाग में या नीचे चले जाते हैं। उनकी तपस्या निर्बाध चलती रहती है।

## व्याकरणबिन्दवः

**सन्धिच्छेदः**

| | | | |
|---|---|---|---|
| वृष्टिभिराश्रयन्ते | = वृष्टिभिः | + आश्रयन्ते | (विसर्ग स्थाने 'र्') |
| यस्यातपवन्ति | = यस्य | + आतपवन्ति | (दीर्घसन्धिः अ + आ = आ) |
| सञ्चरताम् | = सम् | + चरताम् | (अनुस्वारः 'म्' स्थाने – परसवर्ण – ञ्) |

**पदपरिचयः**

| | | | |
|---|---|---|---|
| सञ्चरताम् | – सम् + चर् | + शतृ = | संचरत् ष. ब. व. |
| निषेव्य | – नि + सेव् | + ल्यप् | (क्त्वा स्थाने ल्यप्, यतः धातोः पूर्वम् उपसर्गः) |
| आतपवन्ति | – आतप | + मतुप् = | आतपवत्, नपुं. प्र. ब. व. |
| उद्वेजिताः | – उत् + विज् | + क्त | (विशे.) प्र. ब. व. |

**विग्रहः**

आमेखलम् – आमेखलाभ्यः इति। (अव्ययीभावः 'आङ्' अव्ययम्)

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति।।4।।

**श्लोकः 4**

**पदच्छेदः** कपोलकण्डूः करिभिः विनेतुम् विघट्टितानाम् सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति।।

**अन्वयः** यत्र करिभिः कपोलकण्डूः विनेतुम् विघट्टितानाम् सरलद्रुमाणाम् स्रुतक्षीरतया प्रसूतः गन्धः सानूनि सुरभीकरोति।

हिमालये हस्तिनः स्वकपोलं देवदारूवृक्षेषु कथं घर्षयन्ति इति अत्र बोधामः।

यदा गजानाम् कपोलयोः कण्डूः (खुजली) भवति तदा गजाः कपोलयोः कण्डूः दूरीकर्तुं देवदारूवृक्षेषु घर्षणं कुर्वन्ति। सरलद्रुमाः हिमालये भवन्ति। सरलवृक्षाः लम्बमानाः भवन्ति।

तत्र केभ्यः दुग्धं स्रुतं भवति? देवदारुवृक्षेभ्यः, कस्मात् च कारणात्? देवदारुवृक्षेषु गजानां गण्डस्थलघर्षणकारणात् यतः घर्षणात् तेभ्यः दुग्धं निस्सरति।

गन्धः कस्य भवति? देवदारुवृक्षेभ्यः स्रुतदुग्धस्य। तादृशः गन्धः सर्वाणि शिखराणि सुरभीकरोति। अत्र कालिदासेन हिमालये भ्रमतां गजानां देवदारुवृक्षाणां च स्वाभाविकं चित्रणं कृतम् अस्ति। अद्भुतं प्राकृतिकं सौन्दर्यम्।



15.3

**भावार्थः**

हिमालये देवदारूवृक्षाः गजाः च पर्याप्ताः सन्ति। गजाः कपोलस्थं कण्डूः दूरीकरणाय तत्र देवदारुवृक्षेषु घर्षणं कुर्वन्ति। ततः वृक्षेभ्यः दुग्धं स्रुतं भवति। तस्य दुग्धस्य गंधः सर्वत्र व्याप्तः भवति। अतः तत्र सुगन्धमयं वातावरणं भवति।

हिमालय में बड़े बड़े देवदारु के वृक्ष हैं, हाथी भी बहुत हैं। हाथी अपनी कपोलस्थ खुजली को दूर करने के लिए अपने गण्डस्थल को देवदारु के पेड़ों पर रगड़ते हैं। जिससे उन वृक्षों से दूध निकलता है। वह दूध सुगन्धित होने से सारी चोटियों को सुगन्ध से भर देता है।

## व्याकरणबिन्दवः

**सन्धिच्छेदः**

करिभिर्विनेतुं = करिभिः + विनेतुम् (विसर्गसन्धिः – विसर्गस्थाने – र्)

**पद–परिचयः**

विनेतुम् = वि + नी + तुमुन् (तुमुन् = तुम्) अव्ययपदम्

प्रसूतः = प्र + सूञ् + क्त पु. प्र. वि. ए., विशेषणम्

**विग्रहः**

कपोलकण्डूः = कपोलयोः कण्डूः (षष्ठीतत्पुरुषः)

स्रुतक्षीरतया = स्रुतं क्षीरम् स्रुतक्षीरम् तस्य भावः तया (कर्मधारयः)

## पाठगतप्रश्नाः 15.2

1. अधोलिखितप्रश्नानाम् उत्तराणि लिखन्तु
   (क) हिमालये घनाः कुत्र सञ्चरन्ति?
   (ख) हिमालये वृष्टिभिः उद्वेजिताः के भवन्ति?
   (ग) करिणः कपोलकण्डूः विनेतुं किं कुर्वन्ति?



(घ) स्रुतक्षीरतया प्रसूतः गन्धः कानि सुरभीकरोति?

2. पर्यायपदमेलनं क्रियताम्

| | |
|---|---|
| (क) घनानाम् | (i) शिखराणि |
| (ख) निषेव्य | (ii) नीचैः |
| (ग) शृङ्गाणि | (iii) मेघानाम् |
| (घ) वृष्टिभिः | (iv) उत्पन्नः |
| (ङ) अधः | (v) गजैः |
| (च) करिभिः | (vi) सेवित्वा |
| (छ) प्रसूतः | (vii) वर्षाभिः |

3. प्रदत्तपदैः वाक्यपूर्तिः क्रियताम्

आतपयुक्तानि, सुगन्धितं, सरलवृक्षेषु घर्षणेन, घनाः

(क) हिमालयस्य मध्यभागे ............................................ सञ्चरन्ति।

(ख) वर्षाजन्य शैत्यकारणात् सिद्धाः ............................... शिखराणि आश्रयन्ते।

(ग) हिमालये करिणः स्वमस्तकस्य कण्डूः .................... अपनयन्ति।

(घ) सरलद्रुमेभ्यः निःसृतं दुग्धं ........................................ भवति।

4. उपसर्गयुक्तानि पदानि चिन्वन्तु

आमेखलम्, सञ्चरताम्, सानुगताम्, आश्रयन्ते, आतपवन्ति, उद्वेजिता

---

## तृतीयः अंशः

इदानीं तृतीयम् अंशं पठामः।

**श्लोकः— 5**

भागीरथी निर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातै–
रासेव्यते भिन्नशिखण्डिबर्हैः।।5।।

**पदच्छेदः** भागीरथीनिर्झरशीकराणाम् वोढा मुहुः कम्पितदेवदारुः।
यत् वायुः अनु+ इष्टमृगैः किरातैः आसेव्यते भिन्नशिखण्डिबर्हैः।।

**अन्वयः** अन्विष्टमृगैः किरातैः भागीरथीनिर्झरशीकराणाम् वोढा मुहुः कम्पितदेवदारुः भिन्नशिखण्डिबर्हैः यद् वायुः आसेव्यते।

'हिमालयस्य आन्तरिकं दृश्यं कियत् रमणीयम्' इति अस्मिन् श्लोके बोधामः।

**व्याख्या**

भवन्तः जानन्ति एव यत् हिमालये का प्रमुखा नदी वहति? आम् सत्यम्, भागीरथी (गङ्गा); यस्याः जलम् अमृतम् शीतलं निर्मलं च भवति। हिमालये नाना वृक्षाः सन्ति किन्तु

हिमालये प्रमुखाः वृक्षाः सन्ति देवदारुवृक्षाः। एते विशालाः सरलाः च भवन्ति।

तत्र कीदृशः वायुः वहति? शीतलः, वस्तुतः तत्र मन्दः शीतलः सुगन्धः च वायुः वहति।

वायुः शीतलः कथं भवति? यतः वायुः गङ्गाधारायाः जलबिन्दुभिः युक्तः भवति। तत्र तीव्राः वायवः चलन्ति। तत्र वायुना प्रकम्पिताः देवदारुवृक्षाः दृश्यन्ते।



15.4

प्रकम्पितैः वृक्षैः वायुः कीदृशः भवति? सुगन्धितः। यतः वायुः तद्वृक्षाणां गन्धैः युक्तः भवति। तत्र किराताः मृगान् अन्वेषणाय तत्पराः दृश्यन्ते। ते आखेटार्थं मृगान् अन्वेषयन्ति। तत्र मयूरस्य पक्षान् वायुः विकिरोति। कीदृशः वायुः? मन्दः।

विशेष–ः हिमालये गङ्गायाः उद्गमस्थलं गंगोत्री गोमुखम् च अस्ति।

**भावार्थः**

हिमालये मृगान्वेषणे तत्पराः किराताः त्रिविधं वायुं सेवन्ते – शीतलं सुगन्धितं मन्दं च। गङ्गाधारायाः जलबिन्दुभिः युक्तः वायुः शीतलः वहति। प्रकम्पितदेवदारुयुक्तः वायुः सुगन्धितः वहति। मयूराणां पक्षान् विकीर्णयन् वायुः मन्दः वहति।

हिमालय में हिरनों की खोज में निकले किरात (भील) वहाँ तीन प्रकार की वायु का सेवन करते हैं। वहाँ गङ्गा के पवित्र जल की बूंदों से युक्त शीतल वायु बहती है, देवदारुवृक्षों को हिलाने वाली वायु सुगन्धित होती है तथा मोर के पंखों को बिखेरने वाली वायु मन्द होती है।

## व्याकरणबिन्दवः

**सन्धिच्छेदः**

यद्वायुरन्विष्टमृगैः = यत् + वायुः + अन्विष्टमृगैः ('त' वर्णस्थाने तृतीयाक्षरं 'द्' भवति जश्त्व–सन्धिः। विसर्गस्थाने (ः) 'र्' भवति, परे स्वरः 'अ' अस्ति)

किरातैरासेव्यते = किरातैः + आसेव्यते (विसर्गस्थाने 'र्' परे स्वरः 'आ' अस्ति) विसर्गसन्धिः

**पदपरिचयः**

मुहुः = अव्ययपदम्



टिप्पणी

कम्पितः = √कम्प् + क्त, पुं. प्र. वि. ए. (विशेषणम्)

अन्विष्टः = अनु + इष् + क्त पुं. प्र. वि. ए. (विशेषणम्)

वोढा = √वह् + तृच् वोढृ शब्दः पुं. प्र. वि. ए. (कर्तृ शब्दवत् अस्य रूपाणि भवन्ति–कर्ता कर्तारौ कर्तारः)

**विग्रहः**

भागीरथीनिर्झरशीकराणाम् – भागीरथ्याः निर्झराः = भागीरथीनिर्झराः तेषां शीकराः तेषाम् (ष. त.)

कम्पितदेवदारुः – कम्पितः देवदारुः, कर्मधारयः (विशेषणविशेष्ये)

अन्विष्टमृगैः – अन्विष्टाः मृगाः, कर्मधारयः (विशेषणविशेष्ये)

भिन्नशिखण्डिबर्हः – (शिखण्डिनां बर्हाणि) ष.त., भिन्नानि शिखण्डिबर्हाणि येन सः, अन्यपदार्थप्रधानः बहुव्रीहिः।

**श्लोकः 6**

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।।6।।

**पदच्छेदः** दिवाकरात् रक्षति यः गुहासु लीनम् दिवाभीतम् इव अन्धकारम्।
क्षुद्रे अपि नूनम् शरणम् प्रपन्ने ममत्वम् उच्चैः शिरसाम् सति इव।।

**अन्वयः** यः दिवाभीतम् इव गुहासु लीनम् अन्धकारम् दिवाकरात् रक्षति उच्चैः शिरसां शरणं प्रपन्ने क्षुद्रे अपि सति इव ममत्वम् नूनम् (अस्ति)

वयम् अस्मिन् पद्ये 'शरणागतस्य क्षुद्रस्यापि महद्भिः सम्मानम्' इति भावं बोधामः।

**व्याख्या**

भवन्तः जानन्ति एव यत् दिवाभीतः उलूकः भवति। परम् अपरः अपि एकः दिवाभीतः भवति जानन्ति किम्? आम् अन्धकारः। तत्र हिमालयः अन्धकारं सूर्यात् रक्षति।

अन्धकारः कुत्र लीनः भवति? हिमालयस्य गुहासु।

शरणागतं के रक्षन्ति? महान्तः पुरुषाः।

अपि ते शरणागतानां क्षुद्रपुरुषाणाम् अपि रक्षां कुर्वन्ति?– अवश्यमेव।

अत्र क्षुद्रः कः महान् च कः? जानन्ति किम्–आम्, सत्यम्, दिवाभीतः उलूकः इव अन्धकारः अपि क्षुद्रः अस्ति हिमालयः च महान् कथितः। यतः सः अन्धकारिणम् अन्धकारम् अपि स्व गुहासु शरणं ददाति। अतः महापुरुषाः नीचजने शरणागते सति तम् प्रति अपि सम्मानं कुर्वन्ति एव। तदेव उक्तम्–क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव।

**भावार्थः**

हिमालयः शरणागतवत्सलः महापुरुष इव अस्ति। यथा उलूकः दिवाभीतः भवति तथैव अन्धकारः। सः स्वगुहासु लीनम् अन्धकारं सूर्यात् रक्षति यथा महापुरुषः शरणागतं नीचजनम् अपि रक्षति एव।





हिमालय शरण में आये हुए की पूरी तरह रक्षा करता है। वह दिन से डरे हुए उल्लू के समान अपनी गुफाओं में छिपे अन्धकार की सूरज से उसी प्रकार रक्षा करता है जैसे महापुरुष शरण में आये हुए नीच व्यक्ति की रक्षा करता है।

## व्याकरणबिन्दवः

### सन्धिविच्छेदः

दिवाकराद्रक्षति = दिवकरात् + रक्षति (जश्त्वसन्धिः – प्रथमाक्षरस्य तृतीयवर्णः) (त् – द्)

दिवाभीतमिवान्धकारम् = दिवाभीतम् + इव + अन्धकारम् (संयोगः, दीर्घसन्धिः)

क्षुद्रेऽपि = क्षुद्रे + अपि (पूर्वरूप सन्धिः)

सतीव = सति + इव (दीर्घसन्धिः)

### पदपरिचयः

लीनम् = ली + क्त वि. (द्वि. वि. ए.) (विशेषणम्)

भीतम् = भी + क्त वि. (द्वि. वि. ए.) (विशेषणम्)

प्रपन्ने = प्र + पद् + क्त (सप्तमी ए. व.)

ममत्वम् = मम + त्व (तद्धित प्रत्ययः→ भाववाचकः, नपुं. प्र० वि० ए०)

### विग्रहः

उच्चैः शिरसाम् – उच्चैः शिरः येषाम् तेषाम् (बहुव्रीहिः)

दिवाभीतम् – दिवा भीतः तम् (तत्पुरुषः)

### भाषाप्रयोगः

(क) **क्त–प्रत्ययः** धातोः भवति। क्तान्तपदं क्रियापदं विशेषणपदं च भवति। यथा कृ + क्त = 1. तेन श्रमः कृतः (क्रि.) 2. कृतः श्रमः बालः (वि.)

(1) सकर्मकधातुभिः सह 'क्त' प्रत्ययः कर्मणि भवति तदा वाक्ये कर्तरि तृतीया कर्मणि च प्रथमा विभक्तिः भवति। कर्मपदे यत् लिङ्गं वचनं च भवति तदेव क्तान्त शब्देऽपि। यथा–

बालेन लेखः लिखितः।

त्वया बाला दृष्टा।

मया पुस्तकम् पठितम्।

(2) अकर्मकधातुभिः योगे तु 'क्त' कर्तरि भावे च भवति। कर्तरिप्रयोगे तु कर्तृपदानुसारं प्रथमा विभक्तिः भवति। यथा–

मोहनः गतः (पु.)

बालिका गता (स्त्री.)

भावे तु कर्तरि तृतीया, क्तान्तशब्दः तु नपुंसकलिङ्गे प्रथमा एकवचने च भवति। यथा– गोपालेन गतम्।

(3) विशेषणरूपेऽपि प्रयोगः

यथा – स्थितः हिमालयः।

पृथूपदिष्टाम् धरित्रीम्।

प्रसूतः गन्धः।

कम्पितः देवदारुः।

गुहासु लीनम् अन्धकारम्।

(ख) तुमुन्प्रत्ययः– निमित्तार्थकं क्रियारूपं निष्पादनाय धातोः परे तुमुन् (तुम्) प्रत्ययः भवति। तुमुन्प्रत्यययुक्तं पदम् 'अव्ययम्' भवति। यथा–

सः नाटकं द्रष्टुं गच्छति।

करिणः कण्डूः विनेतुम् मस्तकं घर्षयन्ति।

(ग) 'ल्यप्' प्रत्ययः– एतेन पूर्वकालिकक्रिया निष्पन्ना भवति। यदि धातोः पूर्वं कश्चन उपसर्गः भवति तदा 'क्त्वा' स्थाने 'ल्यप्' (य) भवति। यथा–

किराताः छायां (नि + सेव् + ल्यप्) = निषेव्य गच्छन्ति।

हिमालयः पूर्वापरौ समुद्रौ ( अव + गाह् + ल्यप्) = अवगाह्य स्थितः।

## शब्दरूपाणि

| | इन्दु (उकारान्तपुल्लिङ्गः) | | | मधु (उकारान्तनपुंसकलिङ्गः) | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र० वि० | इन्दुः | इन्दू | इन्दवः | मधु | मधुनी | मधूनि |
| द्वि० वि० | इन्दुम् | इन्दू | इन्दून् | मधु | मधुनी | मधूनि |
| तृ० वि० | इन्दुना | इन्दुभ्याम् | इन्दुभिः | मधुना | मधुभ्याम् | मधुभिः |
| च० वि० | इन्दवे | इन्दुभ्याम् | इन्दुभ्यः | मधुने | मधुभ्याम् | मधुभ्यः |
| पं० वि० | इन्दोः | इन्दुभ्याम् | इन्दुभ्यः | मधुनः | मधुभ्याम् | मधुभ्यः |
| ष० वि० | इन्दोः | इन्द्वोः | इन्दूनाम् | मधुनः | मधुनोः | मधूनाम् |
| स० वि० | इन्दौ | इन्द्वोः | इन्दुषु | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे इन्दो! | हे इन्दू! | हे इन्दवः! | हे मधु! | हे मधुनी! | हे मधूनि! |

| | गच्छत् (शतृप्रत्ययान्तः) (पुल्लिङ्गः) जाता हुआ | | | धनवत् शब्द (मतुप् प्रत्ययान्तः) धनवाला | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र0 वि0 | गच्छन् | गच्छन्तौ | गच्छन्तः | धनवान् | धनवन्तौ | धनवन्तः |
| द्वि0 वि0 | गच्छन्तम् | गच्छन्तौ | गच्छतः | धनवन्तम् | धनवन्तौ | धनवतः |
| तृ0 वि0 | गच्छता | गच्छद्भ्याम् | गच्छद्भिः | धनवता | धनवद्भ्याम् | धनवद्भिः |
| च0 वि0 | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः | धनवते | धनवद्भ्याम् | धनवद्भ्यः |
| पं0 वि0 | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः | धनवतः | धनवद्भ्याम् | धनवद्भ्यः |
| ष0 वि0 | गच्छतः | गच्छतोः | गच्छताम् | धनवतः | धनवतोः | धनवताम् |
| स0 वि0 | गच्छति | गच्छतोः | गच्छत्सु | धनवति | धनवतोः | धनवत्सु |
| सम्बोधनम् | हे गच्छन् | हे गच्छन्तौ | हे गच्छन्तः | हे धनवन् | हे धनवन्तौ | हे धनवन्तः |

धातुरूपाणि नश् = नश्यति, अनश्यत्, नश्यतु, नङ्क्ष्यति, नश्येत्।

त्रस् = त्रस्यति, अत्रस्यत्, त्रस्यतु, त्रसिष्यति, त्रस्येत्।

(लट्, लङ्, लोट्, लृट्, विधिलिङ् लकारेषु, प्र.पु. एकवचने)

## पाठगतप्रश्नाः 15.3

1. प्रश्नानाम् उत्तराणि ददतु
   (क) भागीरथीनिर्झरशीकराणां वोढा कः अस्ति?
   (ख) किराताः हिमालये कान् अन्वेषणाय भ्रमन्ति?
   (ग) हिमालयः अन्धकारं कस्मात् रक्षति?
   (घ) शरणागतं क्षुद्रं प्रति अपि केषां ममत्वं भवति?
2. पर्यायपदमेलनं कुर्वन्तु–

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (क) सज्जनः | (i) दिवाकरः |
| (ख) मयूरः | (ii) दिवा |
| (ग) गङ्गा | (iii) सत् |
| (घ) सूर्यः | (iv) शिखण्डी |
| (ङ) दिनम् | (v) वायुः |
| (च) पवनः | (vi) भागीरथी |

3. एतेषु किं पदं क्तप्रत्ययान्तं नास्ति?
   भीतम्, लीनम्, कम्पितः, किरातः, भिन्नः।







4. 'क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव' इति सूक्तेः प्रदत्तं भावार्थं मञ्जूषायाः पदैः पूरयन्तु–

**भावार्थः** महापुरुषाः नीचजने अपि शरणागते सति ................ इव तं प्रति ........... कुर्वन्ति। यथा हिमालयः स्वगुहासु ...................... अन्धकारं ............... रक्षति एव।

**स्नेहं, सज्जने, सूर्यात्, लीनम्**



## 15.4 किम् अधिगतम्

- हिमालयः पर्वतराजः अस्ति। एषः भारतस्य उत्तरदिशायां स्थितः। अस्य उन्नतानि शिखराणि हिमपूरितानि सन्ति। एष पृथिव्याः परिमाणरूपः।
- हिमालयादेव गङ्गा निर्गच्छति।
- हिमालयस्य प्राकृतिकं सौन्दर्यम् अद्भुतमेव।
- स्वल्पः दोषः गुणसमूहे विलीयते।
- महापुरुषाः शरणागतं क्षुद्रमपि रक्षन्ति।
- 'क्त' कृत्प्रत्ययः। 'क्त' प्रत्यययुक्तं पदं भूतकालिकक्रिया रूपं विशेषणरूपं च भवति। 'तुमुन्' प्रत्ययान्तं पदम् अव्ययपदं भवति।
- 'ल्यप्' प्रत्ययः पूर्वकालिकक्रियार्थे उपसर्गयुक्तेन धातुना सह प्रयुज्यते।
- अन्यपदप्रधानः बहुव्रीहिः भवति।
- गच्छत्, धनवत्, इन्दु, मधु युग्मशब्दरूपेषु भेदः भवति।



## 15.5 योग्यताविस्तारः

**कविपरिचयः**

कालिदासः 'कविकुलगुरुः' इति प्रसिद्धः। अनेन रचिताः सप्त ग्रन्थाः सन्ति। यथा 'रघुवंशम्', 'कुमारसंम्भवम्' इति महाकाव्यद्वयम्, 'ऋतुसंहारः', 'मेघदूतम्' इति खण्डकाव्यद्वयम्, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', 'अभिज्ञानशाकुन्तलम्' इति त्रीणि नाटकानि च।

**देशः**

कालिदासस्य देश–कालयोः विषये विदुषां नैकं मतं विद्यते। परं महाकविना मेघदूते 'उज्जयिनी' श्री विशाला वा इति विशेषरूपेण वर्णिता। अतः 'कालिदासः उज्जयिनी निवासी' आसीत् इति विदुषां मतं वर्तते।





### कालः

प्रायः मन्यते यत् कालिदासः 'उज्जयिनीनरेशस्य शकारेः विक्रमादित्यस्य नवरत्नेषु श्रेष्ठः आसीत्। विक्रमसंवत्–प्रवर्तकस्य विक्रमादित्यस्य राज्याभिषेककालः ईसातः पूर्वम् 57 वर्षाणि मन्यते। अतः कालिदासस्य कालः ई0पू0 प्रथमशताब्दी इति निश्चितः भवति।

### कृतिपरिचयः

'कुमारसम्भवम्'– प्रस्तुतः पाठः अस्मादेव महाकाव्याद् उद्धृतः। अस्मिन् महाकाव्ये 17 सर्गाः सन्ति। तत्र पार्वतीविवाहः, कुमारजन्म, तारकासुरवधः च मुख्यकथाः, अन्यास्तु प्रासङ्गिककथाः सन्ति। कविना उदात्तप्रेम्णः उदाहरणं तु 'मदनदहन' इति माध्यमेन प्रस्तुतम् अस्ति।

### रघुवंशम्

अस्मिन् महाकाव्ये 19 सर्गाः सन्ति। दिलीपतः अग्निवर्णपर्यन्तं राज्ञां वर्णनं विद्यते। इयम् उत्कृष्टा काव्यरचना कालिदासस्य।

### ऋतुसंहारम्

इयं कालिदासस्य प्रथमा कृतिः। अत्र षण्णाम् ऋतूनां सरलं सरसं मनोरमं च वर्णनं विद्यते। षट् सर्गाः सन्ति।

### मेघदूतम्

प्राकृतिकसौन्दर्येण मानसिकभावोद्गाराणां सुन्दरी अभिव्यक्तिः। शापवशात् विरहाकुलस्य यक्षस्य स्वप्रियां प्रति प्रेषितः भावपूर्णः सन्देशः अस्ति।

### मालविकाग्निमित्रम्

नाटकेऽस्मिन् विदिशायाः नृपस्य अग्निमित्रस्य विदर्भस्य च राजकुमार्याः मालविकायाः प्रणयकथा अस्ति। नाटके पंच अंकाः सन्ति।

### विक्रमोर्वशीयम्

अस्मिन् नाटके राज्ञः पुरुरवसः 'उर्वशी' अप्सरायाः च प्रेमकथानकम् अस्ति। नाटके पंच अंकाः सन्ति।

### अभिज्ञानशाकुन्तलम्

अस्मिन् नाटके राज्ञः दुष्यन्तस्य शकुन्तलायाः च प्रणयकथायाः मनोहारि चित्रणम् अस्ति। नाटके सप्त अंकाः सन्ति। 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति प्रसिद्धम्।

### हिमालयः

ब्रह्माण्डपुराणे– कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ।
पूर्वपश्चिमगावेतावर्णवान्तरूपस्थितौ।।







शिवपुराणे– अस्त्युत्तरस्यां दिशि वै गिरीशो हिमवान्महान्।
पर्वतो हि मुनिश्रेष्ठ महातेजास्समृद्धिभाक्।।
पूर्वापरौ तोयनिधी सुविगाह्य स्थितो हि यः।
नानारत्नकरो रम्यो मानदण्ड इव क्षितेः।।

वामनपुराणे– धन्योऽयं पर्वतश्रेष्ठः श्लाध्यः पूज्यश्च देवतैः।

अथर्ववेदे– "गिरयसो पर्वता हिमवन्तोख्यं ते पृथ्वि स्योनमस्तु। (21.1.11)

**(ख) भाषिकयोग्यता विस्तारः**

**'क्त'**

| **धातुः** | **'क्त' योगेन निष्पन्नः मूलशब्दः** | **पुल्लिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|---|---|
| गम् | गत | गतः | गता | गतम् |
| लिख् | लिखित | लिखितः | लिखिता | लिखितम् |
| दृश् | दृष्ट | दृष्टः | दृष्टा | दृष्टम् |
| कृ | कृत | कृतः | कृता | कृतम् |
| प्रच्छ् | पृष्ट | पृष्टः | पृष्टा | पृष्टम् |
| श्रु | श्रुत | श्रुतः | श्रुता | श्रुतम् |
| नी | नीत | नीतः | नीता | नीतम् |

**उपसर्गः + धातुः + ल्यप्**

आ + गम् + ल्यप् = आगम्य (आकर)
वि + लिख् + ल्यप् = विलिख्य (लिखकर)
उप + विश् + ल्यप् = उपविश्य (बैठकर)
वि + जि + ल्यप् = विजित्य (जीतकर)
प्र + दा + ल्यप् = प्रदाय (देकर)
नि + सेव् + ल्यप् = निषेव्य (सेवा करके)
प्र + नम् + ल्यप् = प्रणम्य (प्रणाम करके)
वि + चिन्त् + ल्यप् = विचिन्त्य (सोचकर)
वि + लोक् + ल्यप् = विलोक्य (देखकर)

**बहुव्रीहिसमासः** समस्तपदैः भिन्नस्य अर्थस्य बोधः भवति। समस्तपदम् अन्यपदस्य विशेषणं भवति। एवम्भूतः बहुव्रीहिः समासः। यथा–

पीतानि अम्बराणि यस्य सः इति विग्रहे सति 'पीताम्बरः भवति।

इदं पदम् अन्यपदस्य विष्णोः विशेषणम् अस्ति।

**भेदाः**– प्रमुखाः त्रयो भेदाः सन्ति।

**(क) समानाधिकरणः बहुव्रीहिः**– समस्यमानं प्रत्येकं पदं समानविभक्तिकं (प्रथमाविभक्तियुक्तं) भवति। यत् शब्दे तु द्वितीयातः सप्तमीविभक्तिपर्यन्ताः विभक्तयः भवन्ति।

यथा– प्राप्तम् उदकं येन सः = प्राप्तोदकः (ग्रामः)

पीतानि अम्बराणि यस्य सः = पीताम्बरः

निर्गतं धनं यस्मात् सः = निर्धनः

कम्पितः देवदारु : येन सः = कम्पितदेवदारुः

**(ख) व्याधिकरण बहुव्रीहिः** यस्मिन् समासे प्रत्येकं पदं भिन्नविभक्तिकं भवति, स व्यधिकरणः बहुव्रीहिः भवति। यथा

चक्रं पाणौ यस्य सः = चक्रपाणिः

चन्द्रः शेखरे यस्य सः = चन्द्रशेखरः

चन्द्र इव मुखं यस्याः साः = चन्द्रमुखी

**(ग) तुल्ययोगः बहुव्रीहिः** 'सह' पदस्य तृतीयान्तपदेन समासः भवति। यथा–

पुत्रेण सह विद्यमानः = सपुत्रः आगतः पिता।

परिवारेण सह = सपरिवारः आगतः एषः।

पत्न्या सह = सपत्नीकः गच्छति सः।

## 15.6 पाठान्तप्रश्नाः

1. प्रश्नानाम् उत्तराणि ददतु

   (क) नगाधिराजः कः कथ्यते?

   (ख) हिमालयः कस्याः मानदण्डः इव स्थितः?

   (ग) हिमालयः कयोः समुद्रयोः मध्ये प्रविष्टः अस्ति?

   (घ) गुणसमूहे कीदृशः दोषः निमज्जति?

   (ङ) वृष्टिभिः उद्वेजिताः सिद्धाः कुत्र आश्रयन्ते?

   (च) करिणः किमर्थम् देवदारूवृक्षेषु घर्षणं कुर्वन्ति?

   (छ) हिमालये मृगान्वेषणे तत्पराः किराताः कीदृशं वायुं सेवन्ते?

   (ज) अन्धकारस्य तुलना केन सह कृता?

2. मञ्जूषायां प्रदत्तपदैः वाक्यपूर्तिः क्रियताम्

| |
|---|
| सुरभीकरोति, मध्यभागे, रत्नानि, पृथिव्याः, गङ्गा |

(क) हिमालयः ........................................................................ परिमाणं ज्ञातुं मानदण्डः इव।

(ख) हिमालये अनेकानि ................................................... उपलभ्यन्ते।

(ग) सरलद्रुमेभ्यः निःसृतं दुग्धं शिखराणि ....................।

(घ) हिमालये ........................................................................ नदी प्रवहति।

(ङ) मेघाः हिमालयस्य ...................................................... सञ्चरन्ति।

3. अधः प्रदत्तसूक्तिद्वयस्य भावार्थं चतुर्/पञ्च वाक्येषु लिखन्तु

(क) एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।

(ख) क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।

4. विशेषण–विशेष्यमेलनं क्रियताम्

| 'क' | 'ख' |
|---|---|
| (क) देवात्मा | (i) शृङ्गाणि |
| (ख) पूर्वापरौ | (ii) हिमालयः |
| (ग) आतपवन्ति | (iii) तोयनिधी |
| (घ) विघट्टितानां | (iv) किरातैः |
| (ङ) अन्विष्टमृगैः | (v) सरलद्रुमाणाम् |

5. सन्धिः क्रियताम्

(क) नग + अधिराजः = ........................................

(ख) अस्ति + उत्तरस्याम् = ........................................

(ग) देवता + आत्मा = ........................................

(घ) वृष्टिभिः + आश्रयन्ते = ........................................

(ङ) क्षुद्रे + अपि = ........................................

6. अधः प्रकृति–प्रत्यययोगेन रूपं प्रदर्शयन्तु

(क) स्था + क्त (पु.) ..............................

(ख) जन् + क्त (नपु.) ..............................

(ग) प्र + सू + क्त (पु.) ..............................

(घ) ली + क्त (नपु.) ..............................

(ङ) अव + गाह् + ल्यप् ..............................

(च) नि + सेव् + ल्यप् ..............................

(छ) वि + नी + तुमुन् ..............................

7. विग्रहं समस्तपदं च दर्शयन्तु

(क) नगाधिराजः ..............................





(ख) गुणसन्निपाते ...............................

(ग) कपोलयोः कण्डूः ...............................

(घ) कम्पितः देवदारुः येन सः ...............................

(ङ) अन्विष्टाः मृगाः यैः तैः ...............................

8. अधोलिखितेषु पदेषु विभक्तिं (प्रथमा / द्वितीया) निर्दिशन्तु

(क) देवतात्मा ...............................

(ख) अन्धकारम् ...............................

(ग) छायाम् ...............................

(घ) गन्धः ...............................

(ङ) शृङ्गाणि ...............................

(च) हिमम् ...............................

9. अर्थमेलनं कुर्वन्तु

| क | ख |
|---|---|
| (क) सानूनि | (i) चन्द्रस्य |
| (ख) सौभाग्यम् | (ii) मयूरः |
| (ग) इन्दोः | (iii) समुद्रौ |
| (घ) शिखण्डी | (iv) पर्वतः |
| (ङ) नगः | (v) शिखराणि |
| (च) तोयनिधी | (vi) सौन्दर्यम् |

10. उचितधातुरूपैः रिक्तस्थानानि पूरयन्तु

(क) शुद्धपर्यावरणं विना जीवनं ............................... (नङ्क्ष्यति / नङ्क्ष्यसि)

(ख) दुष्टाः ............................................................... (नश्येत् / नश्येयुः)

(ग) क्रोधात् बुद्धिः ................................................ (नश्यामि / नश्यति)

(घ) अहम् सर्पात् ................................................ (त्रस्यामि / त्रस्यति)

(ङ) त्वं पापात् ................................................... (त्रस्यतु / त्रस्य)

## 15.7 उत्तराणि

### 15.3 बोधप्रश्नाः

1. (क) नगानाम् (ख) वर्धते (ग) आतपवन्ति
   (घ) सरलवृक्षाणां दुग्धस्य गन्धः (ङ) अन्धकारः

2. (क) पृथिव्या (ख) हिमं (ग) आतपवन्ति
   (घ) सुरभीकरोति (ङ) रक्षति



टिप्पणी

3. (क)→(iii), (ख)→(iv), (ग)→(i), (घ)→(ii)

**पाठगतप्रश्नाः**

**15.1** 1. (क) उत्तरस्यां, (ख) मानदण्डः, (ग) हिमालयः, (घ) हिमेन, (ङ) गुणसन्निपाते

2. (क) हिमालयः, (ख) तोयनिधी, (ग) हिमालयस्य, (घ) हिमम्

3. (क) प्राच्य–पश्चिमौ, (ख) पृथिव्याः (ग) स्वल्पः

**15.2** 1. (क) आमेखलं/मध्यभागे, (ख) सिद्धाः/तापसजनाः,

(ग) देवदारूवृक्षेषु घर्षणं, (घ) शिखराणि

2. (क)→(iii), (ख)→(vi), (ग)→(i), (घ)→(vii), (ङ)→(ii), (च)→(v),

(छ)→(iv)

3. (i) घनाः (ii) आतपयुक्तानि (iii) सरलवृक्षेषु घर्षणेन (iv) सुगन्धितं

4. आमेखलम्, सञ्चरतां, आश्रयन्ते, उद्वेलिताः

**15.3** 1. (क) वायुः (ख) मृगान् (ग) दिवाकरात् (घ) महापुरुषाणाम्

2. (क)→(iii), (ख)→(iv), (ग)→(vi), (घ)→(i), (ङ)→(ii), (च)→(v)

3. किरातः

3. क्रमशः→ सज्जने, स्नेहं, लीनम्, सूर्यात्

**15.6 पाठान्तप्रश्नाः**

1. (क) हिमालयः, (ख) पृथिव्याः, (ग) पूर्व–पश्चिमसमुद्रयोःमध्ये, (घ) स्वल्पः दोषः, (ङ) आतपयुक्तानि शिखराणि, (च) कपोलकण्डूः विनेतुं, (छ) शीतलं, सुगन्धितं, मन्दं च, (ज) उलूकेन सह/ नीचजनेन सह

2. (क) पृथिव्याः (ख) रत्नानि (ग) सुरभीकरोति (घ) गङ्गा (ङ) मध्यभागे

3. (क) स्वल्पः दोषः गुणानां समूहे न दृश्यते। यथा चन्द्रस्य कलङ्कः दोषः अस्ति, परं सः तस्य किरणेषु एव लीनः भवति। तस्य प्रकाशं न बाधते। अतः गुणाधिक्ये एकः दोषः न गण्यः।

(ख) महापुरुषाः शरणागतवत्सलाः भवन्ति। ते शरणागतं रक्षन्ति। नीचं जनं अपि रक्षन्ति। ते सज्जनम् इव नीचं प्रति स्नेहं कुर्वन्ति।

4. (क)→(ii), (ख)→(iii), (ग)→(i), (घ)→(v), (ङ)→(iv)

5. (क) नगाधिराजः, (ख) अस्त्युत्तरस्याम्, (ग) देवतात्मा,

(घ) वृष्टिभिराश्रयन्ते, (ङ) क्षुद्रेऽपि

6. (क) स्थितः (ख) जातम् (ग) प्रसूतः (घ) लीनम्
   (ङ) वगाह्य (च) निषेव्य (छ) विनेतुम्
7. (क) नगानाम् अधिराजः (ख) गुणानां सन्निपाते (ग) कपोलकण्डूः
   (घ) कम्पितदेवदारूः (ङ) अन्विष्टमृगैः
8. (क) प्रथमा (ख) द्वितीया (ग) द्वितीया (घ) प्रथमा
   (ङ) प्रथमा / द्वितीया (च) प्रथमा / द्वितीया
9. (क)→(v), (ख)→(vi), (ग)→(i), (घ)→(ii), (ङ)→(iv), (च)→(iii)
10. (क) नङ्क्ष्यति (ख) नश्येयुः (ग) नश्यति
   (घ) त्रस्यामि (ङ) त्रस्य